योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १३६

षट्त्रिंशदधिकशततमः सर्गः १३६

भास उवाच ।

अथाहं तं महादेवं पावकं पृष्टवानिदम् ।

शुकपक्षतिकोणस्थः भूयतामवनीश्वर ।। १

भगवन्सर्वयज्ञेश स्वाहाधिप हुताशन ।

किमिदं नाम संपन्नं कथ्यतां किमिदं शवम् ।। २

वह्निरुवाच ।

श्रूयतामखिलं राजन्यथावद्वर्णयामि ते ।

त्रैलोक्यभासुरानन्तशववृत्तान्तमक्षतम् ।। ३

अस्त्यनन्तमनाकारं परमं व्योम चिन्मयम् ।

यत्रेमान्यपसंख्यानि जगन्ति परमाणवः ।। ४

शुद्धचिन्मात्रनभसि तस्मिन्सर्वगते क्वचित् ।

सर्वात्मन्युदभूत्संवित्संवेदनमयी स्वयम् ।। ५

सा तेजःपरमाणुत्वमपश्यद्वेदनावशात् ।

भावितार्थात्मकतया स्वप्ने त्वमिव पान्थताम् ।। ६

परमाणुरसंवित्त्वादपश्यदणुतां स्वयम् ।

भास्वतीं पद्मजरजस्तुल्यां संकल्पनात्मिकाम् ।। ७

सोच्छूनतां भावयन्ती पुनरप्यभवत्स्वयम् ।

चक्षुरादीनीन्द्रियाणि वपुष्यन्वभवत्स्वतः ।। ८

अपश्यदग्रे च जगच्चक्षुरादि स्वभावतः ।

आधाराधेयवद्भूतमयं स्वप्नपुरं यथा ।। ९

असुरो नाम तत्रासीत्प्राणी मानी बभूव ह ।

असत्यप्रतिभासात्म पितृमातृपितामहः ।। १०

दर्पोत्सिक्ततया तत्र कस्यचित्स महामुनेः ।

यदा मृदितवानासीदाश्रमं शर्मभाजनम् ।। ११

मुनिः शापमदात्तस्य महाकारतयाश्रमः ।

त्वया यन्नाशितो मृत्वा भव त्वं मशकोऽधमः ।। १२

स तच्छापहुताशोऽथ तस्मिन्नेव तदा क्षणे ।

असुरं भस्मसाच्चक्रे जलमौर्व इवानलः ।। १३

निराकारं निराधारमाकाशवलयोपमम् ।

चित्तं किंचिदिवाचेत्यमासीच्चेतनमासुरम् ।। १४

तदेकत्वं ययौ साम्याद्भूताकाशेन चेतनम् ।

तदास्पदेन तत्राथ वायुना चैकतां ययौ ।। १५

आसीच्चेतनवातात्माऽभविष्यत्प्राणिनामकः ।

रजसा पयसा व्याप्तस्तेजसा नभसाणुना ।। १६

स पञ्चतन्मात्रमयश्चिन्मात्रलवकोऽणुकः ।

स्पन्दमाप स्वभावेन व्योम्नि वातलवो यथा ।। १७

अथ तस्यानिलान्तस्थं चेतनं तद्व्यबुध्यत ।

कालानिलजलैर्भूमौ बीजमङ्कुरकृद्यथा ।। १८

शुद्धशापविदन्तस्था मशकत्वविदास्य चित् ।

वेधिता मशकाङ्गानि विदित्वा मशकोऽभवत् ।। १९

स्वेदजस्याल्पदेहस्य निःश्वासनिपतत्तनोः ।

द्वे तस्य मशकस्येह दिने भवति जीवितम् ।। २०

श्रीराम उवाच ।

प्राणिनामिह सर्वेषां योन्यन्तरज एव किम् ।

समुद्भवः संभवति किमुतान्योऽपि वा प्रभो ।। २१

श्रीवसिष्ठ उवाच ।

ब्रह्मादीनां तृणान्तानां द्विधा भवति संभवः ।

एको ब्रह्ममयोऽन्यस्तु भ्रान्तिजस्ताविमौ श्रृणु ।। २२

पूर्वरूढजगद्भ्रान्तिभूततन्मात्ररञ्जनात् ।

भूतानां संभवः प्रोक्तो भ्रान्तिजो दृश्यसङ्गतः ।। २३

अभातायां जगद्भ्रान्तौ भूतभावः स्वयं भवन् ।

यः स ब्रह्ममयः प्रोक्तः संभवो न स योनिजः ।। २४

एवं स्थिते स मशको जगद्भ्रान्तिवशोत्थितः ।

न तु ब्रह्मोत्थितस्तस्य राम चेष्टाक्रमं श्रृणु ।। २५

क्षमेक्षुशष्पकक्षादिपुञ्जगुञ्जेषु गुञ्जता ।

स्वायुषोऽर्धं दिनं तेन सर्वं भुक्तं विवल्गता ।। २६

शाद्वलोदरदोलायां दोलनं बाललीलया ।

चिरमारब्धमेतेन सार्धं मशिकया स्वयम् ।। २७

दोलाश्रमार्तस्तत्रासौ यावद्विश्राम्यति क्वचित् ।

तावद्धरिणपादाग्रगिरिपातेन चूर्णितः ।। २८

हरिणाननसंदर्शत्यक्तप्राणतया तया ।

पूर्वक्रमगृहीताक्षः स जातो हरिणस्ततः ।। २९

विहरन्हरिणोऽरण्ये व्याधेन धनुषा हतः ।

व्याधाननगदृष्टित्वात्संजातो व्याध एव सः ।। ३०

व्याधो वनेषु विहरन्संयातो मुनिकाननम् ।

तत्र विश्रान्तवान्सङ्गान्मुनिना प्रतिबोधितः ।। ३१

भ्रान्तः किमिदमादीर्घदुःखाय धनुषा मृगान् ।

हंसि पासि न कस्मात्त्वं तन्त्रं जगति भङ्गुरे ।। ३२

आयुर्वायुविघट्टिताभ्रपटलीलम्बाम्बुवद्भङ्गुरं

भोगा मेघवितानमध्यविलसत्सौदामनीचञ्चलाः ।

लोला यौवनलालना जलरयः कायः क्षणापायवा-

न्पुत्र त्रासमुपेत्य संसृतिवशान्निर्वाणमन्विष्यतां ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० उ० अ० वि० श० मशकव्याधबोधनं नाम

षट्त्रिशदधिकशततमः सर्गः ।। १३६ ।।